धनफलं, क्ली, ( धनानां फलम् । ) दानभोगादि । यथा, अग्निरुवाच ।
"अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम् ।
रतिपुत्त्रफला दारा: शीलवृत्तफलं श्रुतम् ॥"
इति वह्निपुराणे दानविधिनामाध्याय: ॥

धनवती, स्त्री, (धनमस्या अस्तीति । धन + मतुप् । मस्य व: । स्त्रियां ङीप् । ) धनिष्ठानक्षत्रम् । इति जटाधर: ॥

धनवान्, [ त् ] त्रि, ( धनमस्यास्तीति । धन + मतुप् । मस्य व: । ) धनविशिष्ट: । धनी । इति हलायुध: ॥ ( यथा, रामायणे ।२।६७।१८।
"नाराजके जनपदे धनवन्त: सुरक्षिता: ।
शेरते विवृतद्वारा: कृषिगोरक्षजीविन: ॥")

धनस्यक:, पुं, गोक्षुर: । इति शब्दचन्द्रिका ॥ ( लालसया धनमिच्छतीति । धन + क्यच् । "सर्व्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ ।" ३ । १ । ५१ । इत्यस्य वार्त्तिकोक्त्या सुक् । ततो धनस्य इति नामधातु: + ण्वुल् । लालसया धनेच्छौ, त्रि ॥ )

धनहरी, स्त्री, ( धनं हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ९ । इति अच् । गौरादित्वात् ङीष् । ) चोरनामगन्धद्रव्यम् । तत्पर्य्याय: । राक्षसी २ चण्डा ३ चैम: ४ दुष्पत्र: ५ गणहासक: ६ । इत्यमर: । २ । ४ । १२८ ॥ दुष्कुलीन: ७ विरोध: ८ क्रौधमूर्च्छित: ९ । इति शब्दरत्नावली ॥ चौमक: १० कितव: ११ कोरक: १२ । इति जटाधर: ॥ धनहारके इनन्त:, त्रि ॥

धनाधिप:, पुं, ( धनानामधिप: । ) कुवेर: । इत्यमर: । १ । १ । ७२ ॥ ( यथा, देवीभागवते । ५ । ७ । १८ ।
"सङ्करं सम्परित्यज्य गते शक्रे शचीपतौ ।
यमो धनाधिप: पाशी जग्मु: सर्व्वे भयातुरा: ॥")
अस्य ध्यानं यथा,—
"कुवेरञ्च प्रवक्ष्यामि कुण्डलाभ्यामलङ्कृतम् ।
हारकेयूररचितं सिताम्बरधरं शुभम् ॥
गदाधरञ्च कर्त्तव्यं वरदं मुकुटान्वितम् ।
नरयुक्तविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन गुह्यकै: परिवारितम् ।
महोदरं महाकायं ऋद्ध्यष्टकसमन्वितम् ॥
गुह्यकैर्व्वहुभिर्युक्तं धनव्ययकरैस्तथा ॥"
इति मत्स्यपुराणम् ॥

धनाध्यक्ष:, पुं, ( धनानामध्यक्ष: । ) कुवेर: । इति हलायुध: ॥ ( यथा, अध्यात्मरामायणे । ७ । २ । ४७ ।
"तत: क्रुद्धो दशग्रीवो जगाम धनदालयम् ।
विनिर्जित्य धनाध्यक्षं जहारोत्तमपुष्पकम् ॥")
धनाधिकृत: । तहविलदार इति खाजाञ्चि इति च भाषा । तस्य लक्षणं यथा,—
"लोहवस्त्राजिनादीनां रत्नानाञ्च विधानवित् ।
विज्ञाता फल्गुसाराणामनाहार्य्य: शुचि: सदा ।
निपुणश्चाप्रमत्तश्च धनाध्यक्ष: प्रकीर्त्तित: ॥

आयद्वारेषु सर्व्वेषु धनाध्यक्षसमा नरा: ।
व्ययद्वारेषु च तथा कर्त्तव्या: पृथिवीक्षिता ॥"
इति मत्स्यपुराणे १८६ अ: ॥

धनाशा, स्त्री, ( धनानां आशा । ) धनलोभ: । यथा, विष्णुपुराणे तथा हरिवंशे । ३० । ४६ ।
"जीर्य्यन्ति जीर्य्यत: केशा दन्ता जीर्य्यन्ति जीर्य्यत: ।
धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति ॥"

धनाश्री:, स्त्री, रागिणीविशेष: । धानषी इति भाषा । हनूमन्मते श्रीरागस्य तृतीयभार्य्या । अस्या जाति: षाड़व: । ग्रहं षड्जस्वर: । गानसमय: हिमर्त्तौ द्वितीयप्रहर: कस्यचिन्मते दिवावसानम् । रागमालायामस्या रूपं वियोगिनी रमणी रक्तवसना विच्छेदवेदनया दुर्व्वला कृशा च एकाकिनी वकुलवृक्षतलोपविष्टा रुदन्ती । कल्लिनाथमते मेघरागस्य चतुर्थभार्य्या । भरतमते मालकोषपुत्त्रगान्धाररागस्य पत्नी । इति सङ्गीतशास्त्रम् ॥

धनिक:, पुं, ( धनिना कायतीति । कै + क: । ) धन्याकम् । इति मेदिनी । के, १०६ ॥ अस्मिन्नर्थे क्लीवमिति राजनिर्घण्ट: ॥ ( धनमस्यास्तीति । ठन् । ) धव: । इति हेमचन्द्र: ॥

धनिक:, त्रि, (धनं अस्यास्तीति । "अत इनिठनौ ।" ५।२।११५ । इति ठन् । ) साधु: । धनी । इति मेदिनी । के, १०६ ॥ (यथा, कलाविलासे ।९।१८।
"धूर्त्तकरकन्दुकानां वारवधूचरणनूपुरमणीनाम् ।
धनिकगृहोत्पन्नानां मुक्तिर्नास्त्येव मुग्धानाम् ॥"
उत्तमर्ण: । यथा, मनु: । ८ । ४७ ।
"अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदित: ।
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ॥")

धनिका, स्त्री, ( धनिक + टाप् । ) साधुनारी । इति मेदिनी । के, १०६ ॥ वधू: । इति हेमचन्द्र: ॥ युवती । इति शब्दरत्नावली ॥ प्रियङ्गुवृक्ष: । इति शब्दचन्द्रिका ॥

धनिष्ठा, स्त्री, ( अतिशयेन धनवती । धन + इष्ठन् + टाप् । ) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतत्रयोविंशनक्षत्रम् । तत्पर्य्याय: । श्रविष्ठा २ । इत्यमर: । १ । ३ । २२ ॥ वसुदेवता ३ । इति ज्योतिषम् ॥ भूति: ४ निधानम् ५ धनवती ६ । इति जटाधर: ॥ अस्या: स्वरूपं यथा,—
"मस्तकोपरि समागते धने
मर्द्दलाकृतिनि पञ्चतारके ।
यान्ति कान्तिमति मेघलम्बत:
सारसाश्चिरसवक्षलिप्रिका: ॥"
इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥
तत्र जातस्य फलम् ।
"आचारजातादरचारुशीलो
धनाधिशाली वलवान् दयालु: ।
यस्य प्रसूतौ च भवेद्धनिष्ठा
महत्प्रतिष्ठासहितो नर: स्यात् ॥"
इति कोष्ठीप्रदीप: ॥

धनी, [ न् ] त्रि, (धनमस्त्यस्येति । धन + इनि: । ) धनवान् । (यथा, देवीभागवते । १ । १५ । १३ ।
"शला च धनिनां कार्य्या स्तुति: सर्व्वात्मना बुधै: ॥")
तत्पर्य्याय: । इभ्य: २ आढ्य: ३ । इत्यमर: । ३ । १ । १० ॥ यथा, कूर्म्मपुराणे १२० अ: ।
"आढ्यो वा दीक्षितो नाम्ना यवीयानपि यो भवेत् ।
भो भवत्पूर्व्वकन्त्वेनमभिभाषेत धर्म्मवित् ॥"
"सर्व्वं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ॥"
इति श्रीभागवतम् ॥
( उत्तमर्ण: । यथा, मनु: । ८ । ६१ ।
"यादृशा धनिभि: कार्य्या व्यवहारेषु साक्षिण: ।
तादृशान् सम्प्रवक्ष्यामि यथावाच्यमृतञ्च तै: ॥")

धनीका, स्त्री, युवती । इति शब्दरत्नावली ॥

धनीयकं, क्ली, (धनाय हितम् । धन + छ: । संज्ञायां कन् । ) धन्याकम् । इति शब्दरत्नावली ॥

धनु:, पुं, (धनतीति । धन + "भृमृशीतॄचरीति ।" उणां । १ । ७ । इति उ: । ) चाप: । ( यथा, हितोपदेशे ।
"धनुर्व्वंशविशुद्धोऽपि निर्गुण: किं करिष्यति ॥")
राशिविशेष: । पियालवृक्ष: । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

धनु:, [ स् ] पुं, ( धन + "अर्त्तिपृवपीति ।" उणां २ । ११८ । इति उसि: स च नित् । ) पियालवृक्ष: । धनुर्द्धरे, त्रि । इति मेदिनी । से, २६ ॥

धनु:, [ स् ) क्ली, (धनतीति । धन शब्दे + "अर्त्तिपृवपीति ।"उणां २ । ११८ । इति उसि: स च नित् ।) शरनि:क्षेपयन्त्रम् । धनुक इति भाषा । तत्पर्य्याय: । चाप: २ धन्व ३ शरासनम् ४ कोदण्डम् ५ कार्म्मुकम् ६ इष्वास: ७ । इत्यमर: । २ । ८ । ८३ ॥ स्थावरम् ८ गुणी ९ शरावाप: १० त्वणता ११ त्रिणता १२ । इति त्रिकाण्डशेष: । अस्त्रम् १३ धनू: १४ । इति जटाधर: ॥ तारकम् १५ काण्डम् १६ । इति शब्दरत्नावली ॥ तस्य लक्षणं यथा,—
"धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं वांशं तथैव च ।
कोमलं वर्णदृढ़ता तयोर्गुण उदाहृत: ॥
सुखसम्पत्तिकरणं समसुदायतं धनु: ।
विपदो मुष्टिवैषम्ये तदङ्गे भङ्गमावहेत् ॥"
इति युक्तिकल्पतरु: ॥
धनुर्विद्यारम्भदिनं यथा,—
"शनिभौमवुधान्येषु वारेषु सुतिथौ हरौ ।
प्रबुद्धे चापविद्याया आरम्भ: शुभदो मत: ॥"
इति ज्योति:सारसंग्रह: ॥
विद्यारम्भोक्तनक्षत्राणि तत्र शुभानि ॥
( एतदस्त्रविद्यां ब्रह्मा पृथुनाम्ने महीपतये प्रथमं दत्तवान् । असौ एव लोकेषु अस्या: प्रचारमकरोत् । यदुक्तम् वैशम्पायनेन ।
"असि: पूर्व्वं मया सृष्टो दुष्टनिग्रहकारणात् ।
भवादृशसमीपस्थो लोकान् शिक्षन् चरत्वसौ ॥
धनुराद्यायुधयुक्तो लभेवादि: स्तुतो मया ।